# गीतामृतम्

---

## पाठ्यपुस्तक के प्रश्नोत्तर

### मौखिक प्रश्न:

**प्रश्न 1. उच्चारणं कुरुत**

परित्राणाय
क्रोधात्
भ्रंशाद्
विभ्रमः
बुद्धिनाशो
यद्यदाचरति श्रेष्ठः
सृजाम्यहम्
सङ्गोऽस्त्वकर्मणि
विद्यते
श्रद्धावाँल्लभते
पैशुनम्
ह्रीः
धृतिः
वङ्मयम्
संशुद्धिः

**उत्तरम्:** [**नोट**-उपर्युक्त शब्दों का शुद्ध उच्चारण अपने अध्यापकजी की सहायता से कीजिए।]

**प्रश्न 2. एकपदेन उत्तरं वदत**

(क) क्रोधाद् किं भवति?

**उत्तरम्:** संमोहः

(ख) ज्ञानं कः लभते?

**उत्तरम्:** श्रद्धावान्

(ग) अस्माकं अधिकारः कुत्र अस्ति?

**उत्तरम्:** कर्मणि

(घ) केषां परित्राणाय ईश्वरः सम्भवति?

**उत्तरम्:** साधूनाम्

## प्लिख़ितप्रश्नाः

**प्रश्न 1. अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखत**

(क) परमात्मा आत्मानं कदा सृजति?

**उत्तरम्:** युग-युगे

(ख) वाङ्मयः तपः किम् अस्ति?

**उत्तरम्:** सत्यादिवाक्यं स्वाध्यायाभ्यसनं च

(ग) मौन कीदृशं तपः उच्यते?

**उत्तरम्:** मानसम्

(घ) कः लभते ज्ञानम्?

**उत्तरम्:** श्रद्धावान्।

**प्रश्न 2. उचितपदप्रयोगेण रिक्तस्थानानि पूरयत**
(क) ते अधिकारः अस्ति............।(कर्मणि/अकर्मणि)
(ख) ईश्वरः साधूनां.........-युगे युगे सम्भवति।(विनाशाय/परित्राणाय)
(ग) ...........भवति सम्मोहः। (श्रद्धया/क्रोधात्)
(घ) यद्ययदाचरति........तत्तदेवेतरो जनः।(कनिष्ठ/श्रेष्ठः)

**उत्तरम्:**
(क) कर्मणि,
(ख) परित्राणाय,
(ग) क्रोधात्,
(घ) श्रेष्ठः

**प्रश्न 3. रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कुरुतउदाहरणम्-कर्मणि एव ते अधिकारः**

**प्रश्नः-कस्मिन्नेव ते अधिकारः?**
(क) क्रोधाद् भवति सम्मोहः
(ख) यद्ययदाचरति श्रेष्ठः जनः लोकः तदनुवर्तते
(ग) धर्मस्य ग्लानिर्भवति।

(घ) न हि ज्ञानेन सदृशं पवित्रम्
(ङ) मनः प्रसादः सौम्यत्वं तयोः मानसमुच्यते।

**उत्तरम्:** प्रश्न-निर्माणम्
(क) कस्मात् भवति सम्मोहः?
(ख) यद्ययदाचरति कः जनः लोकः तदनुवर्तते?
(ग) कस्य ग्लानिर्भवति?
(घ) न हि केन सदृशं पवित्रम्?
(ङ) मनः प्रसादः किञ्च कयो। मानसमुच्यते?

**प्रश्न 4.**

| 'क' खण्डम् | | 'ख' खण्डम् |
|---|---|---|
| (क) परित्राणाय | – | सदृशं पवित्रम् |
| (ख) न हि ज्ञानेन | – | ज्ञानम् |
| (ग) श्रद्धावाँल्लभते | – | साधूनाम् |
| (घ) मनः प्रसादः सौम्यत्वं | – | मानसमुच्यते |
| (ङ) भावसंसिद्धिरित्येत्तपो | – | मौनमात्मविनिग्रहः |
| (च) क्रोधात् भवति | – | सम्भवामि युगे युगे |
| (छ) धर्मसंस्थापनार्थाय | – | सम्मोहः |

**उत्तरम्:**

| | | |
|---|---|---|
| (क) परित्राणाय | – | साधूनाम्। |
| (ख) न हि ज्ञानेन | – | सदृशं पवित्रम्। |
| (ग) श्रद्धावाँल्लभते | – | ज्ञानम्। |
| (घ) मनः प्रसादः सौम्यत्वं | – | मौनमात्मविनिग्रहः। |
| (ङ) भावसंसिद्धिरित्येत्तपो | – | मानसमुच्यते। |
| (च) क्रोधात् भवति | – | सम्मोहः। |
| (छ) धर्मसंस्थापनार्थाय | – | सम्भवामि युगे युगे। |

**प्रश्न 5. निम्नाङ्कितपदेषु सन्धिविच्छेदं कुरुत**

**उत्तरम्:**
(क) कर्मण्येव = कर्मणि + एव..
(ख) क्रोधाद् भवति = क्रोधात् + भवति
(ग) ग्लानिर्भवति = ग्लानिः + भवति
(घ) अचिरेणाधिगच्छति = अचिरेण + अधिगच्छति
(ङ) शान्तिरपैशुनम् = शान्तिः + अपैशनम्।

**प्रश्न 6. अधोलिखितपदेषु शब्दं विभक्तिवचनं च लिखत।**

**उत्तरम्:**

| | पदम् | शब्दः | विभक्तिः | वचनम् |
|---|---|---|---|---|
| (क) | साधूनाम् | साधु | षष्ठी | बहुवचनम् |
| (ख) | फलेषु | फल | सप्तमी | बहुवचनम् |
| (ग) | विनाशाय | विनाश | चतुर्थी | एकवचनम् |
| (घ) | ज्ञानेन | ज्ञान | तृतीया | एकवचनम् |
| (ङ) | युगे | युग | सप्तमी | एकवचनम् |
| (च) | अहिंसा | अहिंसा | प्रथमा | एकवचनम् |
| (छ) | परित्राणाय | परित्राण | चतुर्थी | एकवचनम् |

## योग्यता-विस्तारः

(क) पाठ-परिचयःभारतीय संस्कृति के प्रसिद्ध दो उपजीव्य काव्य ग्रन्थ हैं.
1. रा गयण और
2. महाभारत। श्रीमद्भगवद् गीतामहाभारत के भीष्म पर्व का अंश है। इस ग्रन्थ में श्रीकृष्ण के कर्त्तव्यविमुख अर्जुन के लिए दिए गये दिव्य सन्देश हैं। यह ग्रन्थ न केवल अर्जुन के लिए अपितु मानव मात्र के लिए कल्याणकारी है। गीता में अठारह अध्याय और सात सौ श्लोक हैं।

(ख) भाषा-विस्तार:
विसर्ग-सन्धिः
1 .विसर्गस्य पश्चात् 'च' अथवा 'छ' भवति तदा
विसर्गस्य स्थाने 'श' आदेश भवति
यथारामः + चलति = रामश्चलति (विसर्गस्य श् आदेश:)
निः + छल = निश्छलः (विसर्गस्य श् आदेश:)

2. विसर्गस्य पश्चात् 'त्' अथवा 'थ्' वर्णः भवति तदा
विसर्गस्य स्थाने 'स' वर्णः भवति
यथायशः + तनोति = यशस्तनोति (विसर्गस्य स् आदेश:)
नमः + ते = नमस्ते (विसर्गस्य स् आदेश:)

3. अकारस्य परे विसर्गः भवति विसर्गस्य परे पुनः
अकारः भवति तदा पूर्वस्य अकारविसर्गस्य च स्थाने 'ओ' भवति तथा परे स्थितस्य अकारस्य स्थाने "
(अवग्रहः) भवति । यथा
सः + अपि = सोऽपि (विसर्गस्यस्थाने 'ओ' एवं अ स्थाने )
कः + अयम् = कोऽयम्। (विसर्गस्यस्थाने 'ओ' एवं अ स्थाने)

4. विसर्गस्यपूर्व 'अ' एवं विसर्गस्य पश्चात् अन्य स्वरः
भवति तदा विसर्गस्य लोपः भवति । यथा

रामः + आगतः = राम आगतः (विसर्गस्य लोपः)
सूर्यः + उदेति = सूर्य उदेति (विसर्गस्य लोपः)

5. विसर्गस्य पूर्व 'अ' एवं पश्चात् वर्गस्य तृतीयः, चतुर्थः, पञ्चमः वर्ण च भवति, तदा 'अ' एवं विसर्गस्य स्थाने 'ओ' भवति । यथा
पयः + धरः = पयोधरः(अ एवं विसर्गस्य आदेशः = ओ)
पुरः + हितः = पुरोहितः(अ एवं विसर्गस्य आदेशः = ओ)

# अन्य महत्त्वपूर्ण प्रश्नोत्तर

## वस्तुनिष्ठप्रश्नाः

**1. 'गीतामृतम्' पाठस्य क्रमः अस्ति**
(क) द्वितीयः
(ख) सप्तमः
(ग) पञ्चमः
(घ) नवमः

**2. '<u>परित्राणाय</u> साधूनाम्' रेखांकितपदे का विभक्तिः?**
(क) द्वितीया
(ख) चतुर्थी
(ग) षष्ठी
(घ) सप्तमी

**3. 'सम्मोहः' पदे उपसर्गः अस्ति**
(क) निर्
(ख) सम्
(ग) आ
(घ) अनु

**4. 'कर्मण्येव' पदस्य सन्धिविच्छेदं भवति**
(क) कर्मणि + एव
(ख) कर्म + व्येय
(ग) कर्म + एव
(घ) क + र्मण्येय

**5. 'गीताऽमृतं' पाठानुसारेण क्रोधात् किं भवति?**
(क) विवेकः
(ख) ज्ञानम

(ग) बुद्धिनाशः
(घ) सम्मोहः

**6. ते अधिकारः कस्मिन् वर्तते?**
(क) फले
(ख) अकर्मणि
(ग) कर्मणि
(घ) लाभे।

**7. श्रद्धावान् किं लभते?**
(क) ज्ञानम्
(ख) धनम्
(ग) यशः
(घ) अज्ञानम्।

**8. केषां परित्राणाय ईश्वरः अवतरति?**
(क) दुष्कृताम्
(ख) साधूनाम्
(ग) धनिकानां
(घ) मूर्खाणाम।

**उत्तराणि**
1. (ग)
2. (ख)
3. (ख)
4. (क)
5. (घ)
6. (ग)
7. (क)
8. (ख)

मञ्जूषातः समुचितपदानि चित्वा रिक्त-स्थानानि पूरयत

मञ्जूषा
तदा, एव, चे, अनु।
(क) कर्मणि........ते अधिकारः
(ख) लोकस्तद्.........वर्तते
(ग) यदा धर्मस्य ग्लानिः भवति.......आत्मानं सृजाम्यम्।
(घ) सत्यं प्रियहितं...यत्।

**उत्तराणि**
(क) एव,
(ख) अनु,
(ग) तदी,
(घ) च।

## अतिलघूत्तरात्मकप्रश्नाः -(एकपदेन उत्तरत)

**प्रश्न 1. जञानं लब्ध्वा काम् अधिगच्छति?**

**उत्तरम्:** परा शान्तिम्।

**प्रश्न 2. केषां विनाशाय ईश्वरः अवतरति?**

**उत्तरम्:** दुष्कृताम्।

**प्रश्न 3. भावसंशुद्धिः कीदृशं तपः कथ्यते?**

**उत्तरम्:** मानसम्।

**प्रश्न 4. अनुद्वेगकरं वाक्यं कीदृशं तपः उच्यते?**

**उत्तरम्:** वाङ्मयम्।

## लघूत्तरात्मकप्रश्नाः

**(पूर्णवाक्येन उत्तरत)**

**प्रश्न 1. सम्मोहात् किं भवति?**

**उत्तरम्:** सम्मोहात् स्मृतिविभ्रमः भवति

**प्रश्न 2. कस्मात् जनः प्रणश्यति?**

**उत्तरम्:** बुद्धिनाशात् जनः प्रणश्यति।

**प्रश्न 3. सङ्गः कस्मिन् मा भवतु?**

**उत्तरम्:** ते सङ्गः अकर्मणि मा भवतु।

**प्रश्न 4. लोकः कम् अनुवर्तते?**

**उत्तरम्:** श्रेष्ठ: यत् प्रमाणं कुरुते, लोकः तद् अनुवर्तते।

**प्रश्न 5. रेखांकितपदानां स्थाने कोष्ठके लिखितान् पदान् चित्वा प्रश्न निर्माणं कुरुत**
(i) ते अधिकारः कर्मणि एवास्ति। (कस्मिन्/अस्मिन्)
(ii) क्रोधाद् सम्मोहः भवति (कस्योः/कस्मात्)
(iii) स्मृतिभ्रंशाद् बुद्धिनाशः भवति। (कस्मात्/केषाम्)
(iv) श्रद्धावान् लभते ज्ञानम्। (किम्/कः)
(v) ज्ञान लब्ध्वा परां शान्तिमधिगच्छति। (कम्/किम्)
(vi) एतत् वाङ्मयं तप उच्यते । (कीदृशः/कीदृशं)
(vii) सम्मोहात् स्मृतिविभ्रमः भवति। (किम्/काम्)

**उत्तरम्:** प्रश्ननिर्माणम्

(i) ते अधिकारः कस्मिन् एवास्ति?
(ii) कस्मात् सम्मोहः भवति?
(iii) कस्मात् बुद्धिनाशः भवति?
(iv) कः लभते ज्ञानम्?
(v) किम् लब्ध्वा परां शान्तिमधिगच्छति?
(vi) एतत् कीदृशं तप उच्यते?
(vii) सम्मोहात किम् भवति?

**प्रश्न 6. समानार्थकानि पदानि मेलयत**
(i) विभ्रमः अलौकिकम्
(ii) ग्लानिःलज्जा
(iii) मार्दवम् हानिः
(iv) ह्रीःधैर्यम्
(v) धृतिःकोमलता
(vi) दैवीम्भ्रान्तिः

**उत्तरम्:**
(i) विभ्रमः – भ्रान्तिः
(ii) ग्लानिः – हानिः
(iii) मार्दवम् – कोमलता
(iv) ह्रीः – लज्जा
(v) धृतिः – धैर्यम्।
(vi) दैवीम् – अलौकिकम्

**प्रश्नः 7. अधोलिखितपदान् चित्वा पेद्यस्य (श्लोकस्य) पूर्तिं कुरुत।**
(1)( दुष्कृताम्, साधूनां, संस्थापनार्थाय, युगे युगे।
परित्राणाय.............
विनाशाय च..............

धर्म.............
सम्भवामि............
उत्तरम्:
परित्राणाय साधूना, विनाशाय च दुष्कृताम्
धर्मसंस्थापनार्थाय, सम्भवामि युगे युगे।

(2) ( सम्मोहात्, क्रोधाद्, प्रणश्यति, बुद्धिनाशः)
........भवति सम्मोहः,
................स्मृतिविभ्रमः
स्मृतिभ्रंशा............
बुद्धिनाशात्..........
उत्तरम्:
क्रोधाद् भवति सम्मोहः, सम्मोहात् स्मृतिविभ्रमः
स्मृतिभ्रंशाद् बुद्धिनाशः, बुद्धिनाशात् प्रणश्यति

(3) (चैव, वाक्यं, उच्यते, प्रियहितं )
अनुद्वेगकरं...............सत्यं............च............... यत्।
स्वाध्यायाभ्यसनं ....... वाङ्ग यं तपः..........
उत्तरम्:
अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते।

## पाठ-परिचय

**[**संसार में मानव को ज्ञान, भक्ति एवं कर्म का सदुपदेश देने में श्रीमद्भगवत् गीता का महत्त्व सर्वोपरि है। यह महाभारत का अंश है। युद्ध क्षेत्र में अपने परिजनों को सामने देखकर कर्तव्यविमुख हुए अर्जुन को कर्तव्य-बोध कराने के लिए भगवान् श्रीकृष्ण द्वारा जो महत्त्वपूर्ण उपदेश दिया गया, उसी का नाम गीता है। इसे सभी उपनिषदों का सार माना गया है। प्रस्तुत पाठ में गीता में से दस प्रमुख श्लोकों को उद्धृत किया गया है, जो अत्यन्त प्रेरणादायक हैं।**]**

## पाठ के कठिन

शब्दार्थ-हेतुः (कारणम्) = कारण। सम्मोहः (मूढता) = मूर्खता। विभ्रमः (भ्रान्तिः) = भटकाव। ग्लानिः (हानिः) = हानि। अभ्युत्थानमधर्मस्य(अधर्मस्य विकासम्) = अधर्म का बढ़ना। परित्राणाय (रक्षणाय) = रक्षा करने के लिए। आत्मानम् (स्वयमेव) = अपने आपको। संयतेन्द्रियः (संयतानि इन्द्रियाणि यस्य सः) = इन्द्रियों को वश में रखने वाला। अपैशुनम् (न पैशुनम्) = चुगली न करना। मार्दवं (मृदुता) = कोमलता हीः (लज्जा) = लन्जा। अचापलम् (स्थिरता) = चंचलता का अभाव। धृतिः (धैर्यम्) = धीरज। दैवीम्। (अलौकिकम्) = अलौकिक। अभिजातस्य (कुलीनस्य) = उच्च कुलोत्पन्न पुरुष के। अनुगकर (येन क्रोध न जायते) = क्रोध पैदा नहीं करने वाले। वाङ्मयं (वाग्युक्तम्) • वाणी का। मनः प्रसादः (हर्षः) • मन की प्रसन्नता। सौम्यत्वं (सारल्यम्) =सरलता। आत्मविनिग्रहः (आत्मसंयमः) = स्वयं संयम करना। भावसंशुद्धिः। (भावनाशुद्धिः) = भावनाओं की शुद्धता।

## पाठ के श्लोकों का संस्कृत एवं हिन्दी में भावार्थ

(1)
(i) कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि॥१॥
(ii) क्रोधाद् भवति सम्मोहः सम्मोहात्स्मृतिविभ्रमः।
स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात्प्रणश्यति॥२॥

**संस्कृत-भावार्थ:-**
(i) कर्मणि एवं भक्तः अधिकारम् अस्ति, फलेषु कदापि तव अधिकारः नास्ति अर्थात् कर्मणः फलं तु ईश्वरः एव ददाति। अतः भवान् कर्मफलविषये कदापि न इच्छेत्, न च अकर्मणि भव। सततं क्रियाशीलं भूत्वा कर्म एवं कर्तव्यम्।
(ii) क्रोधात् मूढ़ता उत्पन्नं भवति, मोहात् स्मृतिः भ्रमिता जायते। स्मृतेः विनाशात् बुद्धिनाशः भवति। ततः बुद्धेः विनाशात् मानवस्य विनाश: जायते।

**हिन्दी-भावार्थ-**
(i) कर्म करने में ही तुम्हारा अधिकार है, फल प्राप्त करने में नहीं। फल देना तो ईश्वर का अधिकार है। अत: कर्मफल के प्रति कभी भी कारण मत बनो और अकर्म में आसक्त भी नहीं होना चाहिए अर्थात् हमेशा फल की इच्छा के बिना सत्कर्म करते रहना चाहिए।
(ii) क्रोध से मूर्खता उत्पन्न होती है और मूर्खता से स्मृति भ्रमित हो जाती है। स्मृति का विनाश होने से बुद्धि का नाश होता है, तथा बुद्धि का विनाश होने से मनुष्य का विनाश हो जाता है। अतः क्रोध कभी नहीं करना चाहिए।

(2)
(iii) यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते॥३॥
(iv) यदा यदा हि धर्मस्य, ग्लानिभर्ववति भारत!
अभ्युत्थानमधर्मस्य, तदात्मानं सृजाम्यहम्॥४॥

**संस्कृत-भावार्थ:-**
(iii) यथायथा श्रेष्ठजनः आचरणं करोति, तथा-तथा एवं अन्यः जनः (सामान्यजनः) अपि आचरणं करोति। सः श्रेष्ठः यस्य सिद्धान्तस्य नियमस्य वा निर्माणं करोति, संसार: तस्यैव अनुसरणं करोति।
(iv) श्रीकृष्णः (ईश्वर:) कथयति यत् हे अर्जुन! यदा-यदा संसारे धर्मस्य हानिः तथा अधर्मस्य विकासः भवति, तदा तदा एव अहं स्वयमेव अवतारं जन्म वा ग्रहणं करोमि।

**हिन्दी-भावार्थ-**
(ii) जिस प्रकार से श्रेष्ठ लोग आचरण करते हैं, उसी प्रकार दूसरे लोग भी आचरण करते हैं। वह श्रेष्ठ व्यक्ति जिस नियम या सिद्धान्त को बनाता है संसार उसी का अनुकरण करता है।
(iv) श्रीकृष्ण भगवान् अर्जुन से कहते हैं कि हे अर्जुन ! जब-जब संसार में धर्म की हानि तथा अधर्म का विकास होता है, तब-तब मैं स्वयं को संसार में अवतरित (निर्माण) करता हूँ।

(3)
(v) परित्राणाय साधूनां, विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय, सम्भवामि युगे युगे॥५॥
(vi) श्रद्धावल्लभते ज्ञानं तत्परः संयतेन्द्रियः।
ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति॥६॥

**संस्कृत-भावार्थ:-**
(v) श्रीकृष्णः कथयति यत् अहं सज्जनानां रक्षणाय, दुर्जनानां च विनाशाय, धर्मस्थापनाय प्रत्येकस्मिन् युगे अवतारं (जन्म) ग्रहणं करोमि।
(vi) श्रद्धावान् एवं ज्ञानं प्राप्नोति। तथा च यस्य इन्द्रियाणि वशीभूतानि सन्ति सः जनः ज्ञानं प्राप्य परमां शान्तिं शीघ्रमेव प्राप्नोति।

**हिन्दी-भावार्थ-**
(v) श्रीकृष्ण भगवान् कहते हैं कि सज्जनों की रक्षा करने के लिए, दुर्जनों का विनाश करने के लिए और धर्म की स्थापना करने के लिए इस संसार में मैं प्रत्येक युग में अवतार लेता है।
(vi) अपनी इन्द्रियों को वश में रखने वाला तथा श्रद्धावान् व्यक्ति ज्ञान को प्राप्त करता है, तथा ज्ञान को प्राप्त करके वह शीघ्र ही परम शान्ति को प्राप्त होता है।

(4)
(vii) अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम्।
दया भूतेष्वलोलुपत्वं मार्दवः ह्वीरचापलम्॥७॥
(viii) तेजः क्षमा धृतिः शौचमदोहो नातिमानिता।
'भवन्ति सम्पदं देवीमभिजातस्य भारत!॥८॥

**संस्कृत-भावार्थ:-**
(vii) अहिंसा, सत्यम्, क्रोधस्य अभावः, त्यागः, शान्तिः, अपैशुनम्, सर्वप्राणिषु दयाभावः लोभहीनता, मृदुता, लज्जा तथा स्थिरता।
(viii) तेजः, क्षमाशीलता, धैर्यम्, पवित्रता, अद्रोह; तथा अभिमानरहितता ऐते गुणा: उच्चकुलोत्पन्नजनस्य अलौकिकं धनं (सम्पत्तिः) भवति।

**हिन्दी-भावार्थ-**
(vii) भगवान् श्रीकृष्ण कहते हैं कि हे अर्जुन ! अहिंसा, सत्य, अक्रोध, त्याग, शान्ति, चुगली न करना, सभी प्राणियों में दया का भाव, लोभहीनता, कोमलता, लज्जा तथा चंचलता का अभाव।
(viii) एवं तेज, क्षमाशीलता, धैर्य, पवित्रता, द्रोह (द्वेष) न करना तथा अभिमान न करना—ये गुण उच्च कुल में उत्पन्न मनुष्य की सम्पत्ति होते हैं।

(5)
(ix) अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत्।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते॥९॥
(x) मनः प्रसादः सौम्यत्वं मौनमात्मविनिग्रहः।
भावसंशुद्धिरित्येतत्तपो मानसमुच्यते॥१०॥

**संस्कृत-भावार्थ:-**
(ix) येन क्रोधो न जायते, सत्यम्, प्रियम्, हितकरं च वाक्यम्, स्वाध्यायः, अभ्यासश्च वाण्याः तपः कथ्यते।
(x) हर्षः, सारल्यम्, मौनम्, आत्मसंयमः, भावनाशुद्धिः च–ऐते मनसः (मानसिकं) तपः कथ्यते।

**हिन्दी-भावार्थ-**
(ix) क्रोध पैदा नहीं करने वाले, सत्य, प्रिय और हितकारी वाक्य तथा स्वाध्याय और अभ्यास को वाणी का तप कहा जाता है।
(X) मन की प्रसन्नता (हर्ष), सरलता, मौन, स्वयं संयम करना तथा भावनाओं की शुद्धताइनको मानसिक तप। कहा जाता है।

**पाठ्य-पुस्तक के सन्धियुक्त पदों के सन्धि-विच्छेद**

| पदानि | | सन्धि-विच्छेदम् |
|---|---|---|
| कर्मण्येवाधिकारस्ते | = | कर्मणि + एव + अधिकारः + ते |
| कर्मफलहेतुर्भूः | = | कर्मफलहेतुः + भूः |
| सङ्गोऽस्त्वकर्मणि | = | सङ्गः + अस्तु + अकर्मणि |
| यद्यदाचरति | = | यत् + यत् + आचरति |
| यत्प्रमाणम् | = | यत् + प्रमाणम् |
| लोकस्तदनुवर्तते | = | लोकः + तत् + अनुवर्तते |
| ग्लानिर्भवति | = | ग्लानिः + भवति |
| अभ्युत्थानमधर्मस्य | = | अभि + उत्थानम् + अधर्मस्य |
| तदात्मानं | = | तदा + आत्मानं |
| सृजाम्यहम् | = | सृजामि + अहम् |
| धर्मसंस्थापनार्थाय | = | धर्मसंस्थापन + अर्थाय |
| श्रद्धावाँल्लभते | = | श्रद्धावान् + लभते |
| संयतेन्द्रियः | = | संयत + इन्द्रियः |
| शान्तिमचिरेणाधिगच्छति | = | शान्तिम् + अचिरेण + अधिगच्छति |
| सत्यमक्रोधस्त्यागः | = | सत्यम् + अक्रोधः + त्यागः |
| शान्तिरपैशुनम् | = | शान्तिः + अपैशुनम् |
| भूतेष्वलोलुपत्वं | = | भूतेषु + अलोलुपत्वं |
| ह्रीरचापलम् | = | ह्रीः + अचापलम् |
| शौचमद्रोहोनातिमानिता | = | शौचम् + अद्रोहः + न + अतिमानिता |
| दैवीमभिजातस्य | = | दैवीम् + अभिजातस्य |
| अनुद्वेगकरम् | = | अन् + उद्वेगकरम् |
| स्वाध्यायाभ्यसनं | = | स्वाध्याय + अभ्यसनं |
| चैव | = | च + एव |
| मौनमात्मविनिग्रहः | = | मौनम् + आत्मविनिग्रहः |
| भावसंशुद्धिरित्येतत्तपो | = | भावसंशुद्धिः + इति + एतत् + तपो |
| मानसमुच्यते | = | मानसम् + उच्यते |